3

1075CH03

# अनुच्छेदलेखनम्

**(श्रवण-भाषण-कौशल-विकासार्थम्)**

**1. जन्तुशाला**

जन्तूनां शाला जन्तुशाला इति कथ्यते। जन्तुशालायाम् अनेके पशवः पक्षिणः च भवन्ति। जनाः इमान् पक्षिणः पशून् च द्रष्टुम् दूरतः आगच्छन्ति। जन्तुशालायाः सर्वाः व्यवस्थाः प्रशासनेन क्रियन्ते। बालकाः जन्तुशालां गत्वा प्रसन्नाः भवन्ति।

**2. स्वच्छता**

स्वच्छता जीवने आवश्यकी भवति। सामान्यतया जनाः स्वगृहं स्वच्छीकुर्वन्ति, परं मार्गस्य प्रतिवेशस्य च स्वच्छतायाः विषये अवधानं न यच्छन्ति। अस्माकं प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपितुः गान्धिनः जन्मदिवसे स्वच्छताभियानस्य आरम्भं कृतवान्। अधुना बालकाः अपि स्वच्छताविषये जागरूकाः सन्ति। ते स्वगृहं विद्यालयं च यथाशक्ति स्वच्छं कर्त्तुं प्रयतन्ते।

**3. वृक्षो रक्षति रक्षितः**

वृक्षाः जीवनस्य आधाराः भवन्ति। वृक्षैः, नदीभिः, पर्वतैः च सुशोभिता इयं प्रकृतिः मानवानां कृते उपयोगिनी भवति। परं स्वार्थरताः मानवाः विकासं प्रति अन्धधावनशीलाः निर्ममभावेन वृक्षान् कृन्तन्ति। अस्माभिः सर्वैः तथ्यमिदं ध्यातव्यं यत् यदा वयं वृक्षाणां रक्षणं करिष्यामः तदा वृक्षाः अस्माकं रक्षां करिष्यन्ति। वृक्षाणाम् अवदानविषये श्लोकोऽयं दर्शनीयः अपि—

पत्रपुष्पफलच्छायामूलवल्कलदारुभिः।
गन्धनिर्यासभस्मास्थितोक्यैः कामान् वितन्वते॥

**4. हीमादासः**

हीमादासः असमराज्यस्य एकस्मिन् अतिनिर्धने कृषकपरिवारे जन्म अलभत। अस्याः जन्म जनवरीमासस्य नवम्यां तिथौ द्विसहस्रतमे (2000) वर्षे अभवत्। दारिद्र्यात् सुविधानाम् अभावे सा नियमितं प्रशिक्षणमपि न प्राप्नोत् तथापि सा हतोत्साहा नाभवत्। विंशतिवर्षपर्यन्तवयसां कृते या आइ.ए.ए.एफ धावनप्रतियोगिता अभवत् तस्यां सा

© NCERT not to be republished

स्वर्णपदकं प्राप्य भारतवर्षं गौरवान्वितम् अकरोत्। वस्तुत: आदर्शरूपा प्रेरणास्वरूपा च सा सर्वस्मै युववर्गाय।

**5. सहिष्णुता**

वयं प्रतिदिनं समाचारेषु यातायातमार्गेषु वर्धमानां हिंसाम् अधिकृत्य समाचारान् शृणुम:। अतीव दु:खदायिनी एषा स्थिति: यत: अद्यत्वे जनेषु सहिष्णुताया: अभाव: जात:। वस्तुत: सहिष्णुताया: अभावे मानवस्य दुर्गति: एव भवति। समाजस्य विघटनस्य कारणमपि धार्मिक-सहिष्णुताया: अभाव: एवास्ति। यदि अस्माकं मनसि 'वयं सर्वे सदृशा: स्म:' इति भावना भवेत् तदा प्रकृत्या एव वयं सहनशीला: भविष्याम:। क्रोधं संयम्य उचितानुचितं विचार्य एव कोऽपि निर्णय: कर्तव्य:।

**6. संस्कृतशिक्षणम्**

प्राचीनकाले संस्कृतं व्यवहारस्य भाषासीत् परम् अधुना एषा तथा न दृश्यते मन्यते। संस्कृतभाषा जनभाषा भवेद् एतदर्थं 'संस्कृतभारती' नामकं संस्थानं संस्कृतभाषाया: प्रचाराय प्रसाराय च प्रयतते। अत्र अनेका: परियोजना: प्रचाल्यन्ते यासु बालानां वयस्कानां च कृते संस्कृतसम्भाषण-शिक्षणस्य रुचिकरी व्यवस्था क्रियते। 'वदतु संस्कृतम्', 'संस्कृतव्यवहार-साहस्री', 'भाषाप्रवेश:', 'गीतसंस्कृतम्', शिशुसंस्कृतम् इत्यादीनि अनेकानि बालोपयोगीनि पुस्तकानि अपि अनेन संस्थानेन प्रकाशितानि। सान्द्रमुद्रिका: ध्वनिमुद्रिका: अपि इत: प्राप्तुं शक्यन्ते। एवं संस्कृतभाषाधिगमाय सर्वथा उपयुक्तमेतत् स्थानम्।

**7. मम धर्म:**

अहं मानव: अस्मि। मानवता मम गुण: धर्म: च। धर्मस्य दृष्ट्या अहं केवलं भारतीय: एव अस्मि। विस्तरेण यदि कथयामि तर्हि भारतीय-परम्परानुसारं धर्म: जीवनव्यवहार: भवति। एवं भ्रातृत्वं, पितृत्वं, शिक्षकत्वं, छात्रत्वं, सहयोगित्वं, मित्रत्वचेत्यादम: मे अनेके धर्मा:। एतै: सर्वै: धर्मै: उपेत: अहम् एक: भारतीय: एतदेव सत्यम्। भारतस्य उन्नत्यर्थं प्रयतिष्ये भारतीयां संस्कृतिम् च उन्नेष्यामि-एष मम सङ्कल्प:।

**8. पुस्तकम्**

पुस्तकानि मानवस्य सर्वोत्तममित्राणि। कुपितं मित्रम् अस्माभि: सह कपटं कर्तुं शक्नोति परं पुस्तकानि सदैव अस्माकं कल्याणाय सज्जानि भवन्ति, अत: अस्माभि: एतादृशं हितकरं मित्रं कदापि न त्याज्यम्। प्रत्यक्षम् अप्रत्यक्षं सर्वविधं ज्ञानं पुस्तकेभ्य: प्राप्तुं शक्यते। अत एव कथितमपि— 'सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव स:।' अत: पुस्तकमेलकानि अपि भवन्ति यत्र वयं विविधविषयाणां पुस्तकानि एकस्मिन्नेव स्थाने प्राप्तुं क्षमा:, अत: अस्माभि: सदैव स्वाध्यायपरै: भवितव्यम्।

**9. स्वाध्याय:**

विद्यालये पठितस्य पाठस्य यदा गृहे वयं पुन: अध्ययनं कुर्म: तद्विषये चिन्तनं कुर्म: अभ्यासं वा कुर्म: तत्कर्म 'स्वाध्याय' इति कथ्यते। अद्यत्वे छात्राणां मूलसमस्या स्वाध्यायस्य अभाव: अस्ति। विद्यालये पञ्च-षड्-होरापर्यन्तम् अध्यापकेभ्य: विविधविषयानवगत्य छात्र: गृहं प्राप्नोति तदा च अन्यशिक्षकेभ्य: व्यक्तिगतरूपेणापि पाठनस्य प्रबन्धं पितरौ कुरुत:। एवं छात्रेभ्योऽपि इदमेव प्रतीयते यद् वयं प्रात:कालात् आरभ्य सायं यावत् पठाम: एव, अत: अधुना मनोरञ्जनाय अन्यत् किमपि कर्तव्यम्। एवं स्वाध्यायस्य अभावे विषयस्तु हृदयङ्गम: एव न भवति अपि तु परीक्षा चिन्ताकारणं सिध्यति अत: आवश्यकता तु इयमस्ति यत् पठित: विषय: प्रतिदिनं स्वाध्यायेन हृदयङ्गम: करणीयय:।

**10. मयूर:**

मयूर: अस्माकं राष्ट्रियपक्षी अस्ति। एष: मूलत: वन्यपक्षी अस्ति। बहुरङ्ग: मयूर: अतिसुन्दर: प्रतिभाति। वर्षाकालं वसन्तर्तुं च प्राप्य एष: सुन्दरम् आकर्षकञ्च नृत्यं करोति। एतस्य नृत्यं दृष्ट्वा केकारवञ्च श्रुत्वा जना: मुदिता: भवन्ति। भारतवत् म्याँमारस्य, श्रीलङ्कायाश्चापि राष्ट्रियपक्षी मयूर: अस्ति। देवानां सेनापते: कार्तिकेयस्य वाहनम् अपि मयूर: एवास्ति। मयूरपिच्छं विना श्रीकृष्णस्य शृङ्गार: अपूर्ण: मन्यते। अस्माभि: मयूरप्रजाति: रक्षणीया।

**11. आतङ्कवाद:**

हिंसात्मकक्रियाभि: स्वकीय-वर्चस्वस्थापनाय भयोत्पादनम् अथवा भयस्य वातावरण-निर्माणम् एव आतङ्कवाद: उच्यते। एष: केनापि एकेन जनेन समूहेन वा भवितुं शक्यते। अयम् असामाजिकतत्त्वै: असंवैधानिक-क्रियाभि: स्वकीयेच्छां पूरयितुं विभिन्नस्तरेषु सञ्चाल्यमान: भवति। अनेन सामान्यजीवनं सङ्कटापन्नं भवति। आतङ्कवादेन गृहे, समाजे, देशे, विदेशेषु च असुरक्षाया: भाव: भयञ्च उत्पद्यते। जनसम्मर्दे यत्र कुत्रापि, कदापि, किमपि भवितुं शक्यते। आतङ्कवादिसङ्घटनानां मुख्यं लक्ष्यं भयोत्पादनमेव। आतङ्कवादस्य समूलनाशाय सर्वेषां राष्ट्राणां सहयोग: परमावश्यक: अस्ति।

**1. अधोलिखितविषयानधिकृत्य पञ्चवाक्यात्मकमनुच्छेदं लिखत –**

(i) भूकम्पविभीषिका (ii) पर्वतारोहणम् (iii) पर्यावरणसंरक्षणम् (iv) गृहकार्यं कियत् उपयोगि? (v) मम जीवनलक्ष्यम् (vi) हास्योपचार: (vii) ग्राम्यजीवनम् (viii) जलसंरक्षणस्य उपाया: (ix) विद्यालयस्य उन्नत्यै छात्राणां सहयोग: (x) क्रीडाप्रतियोगिता।

© NCERT not to be republished